

# Sri Surya Shata Nama Stotram – Brihad Dharma Puranam

## ॥ श्रीसूर्य शत नाम स्तोत्रं - बृहद्धर्म पुराणम् ॥

The following is a rare **Surya Shata Nama Stotram** (**100 names of Lord Surya**) from **Brihad Dharma Puranam**, **Chapter 11**. **Sage Vyasa gives** this 100 names of Lord Surya and declares that one who chants this names after due Surya worship will see the eradication of all sins, misfortunes, Jvaras (fevers) and diseases.

व्यास उवाच -

शृणुष्व द्विज शार्द्दूल सूर्य स्तोत्रं महाफलम् ।
यच्छ्रुत्वा च पठित्वा च सर्व पापैः प्रमुच्यते ॥ १ ॥

## ॥ सूर्य स्तोत्रम् ॥

ओंकाररूपो भगवान् भास्करश् च विकर्त्तनः ।
सूर्यो रविः काश्यपेयो भानुर् दिनकरः प्रभुः ॥ १ ॥

लोक प्रकाशकः साक्षी श्रीमांल् लोक दिगीश्वरः ।
गभस्ति माली सप्ताश्वस् त्रिगुणः कमलासनः ॥ २ ॥

ग्रहेश्वरो गुणाधारो ब्रह्म विष्णु शिवात्मकः ।
ज्योतिष्मान् ज्योतिषां नाथो ब्रह्मा ब्राह्मण दैवतः ॥ ३ ॥

त्रैगुण्य नायको दिव्यो लोकबन्धुर् भयापहः ।
तिमिरारी रश्मिमाली सहस्र किरणः करी ॥ ४ ॥

शूरः करीन्द्रो मैत्रेयः केवलात्मा ऽ र्य्यमा ऽ मलः ।
पद्म प्रकाशको धाता विष्णुस् त्वष्टा ऽ म्शुरेव च ॥ ५ ॥

वेदात्मा वेद वेद्यश् च यम कर्त्ता ऽ श्विनी पतिः ।
नासत्यदस्र जनको ज्ञानज्योतिः सनातनः ॥ ६ ॥

पूषा विवस्वान् आदित्यो द्वादशात्मा दिवाकरः ।
अहस्करः प्रभाराशी रोगहा रुक् चिकित्सकः ॥ ७ ॥

महौषध स्मृतिः पुण्यः परमार्थः स्मृतार्तिहा ।
ऋषि स्तुत्यो जप प्रीतो गायत्री जनको ऽ व्ययः ॥ ८ ॥

गायत्री जप सुप्रीतस् त्रिसन्ध्यपर सुप्रियः ।
शिव पूजक सुप्रीतो विष्णु पूजक सुप्रियः ॥ ९ ॥

गङ्गा स्नान प्रिय प्रीतो दुर्गा जप सुहृद्दरः ।
पितृ मातृ भक्ति भक्तो धर्मो ऽ धर्मात्म दण्ड कृत् ॥ १० ॥

रक्त वर्णः श्याम वर्णो धवलः कालभेदतः ।
स्वयंभूर् अन्नदो वारि प्रदो ह्यरुण सारथिः ॥ ११ ॥

पिता पितामहो देवो दक्षिणाशा पतिः सुरः ।
आकाश रत्नं तरणिश् चत्रभानुर् विरोचनः ॥ १२ ॥

मार्त्ताण्डो ऽ र्क्को वायु कर्त्ता सम्यक् ज्ञाता कृपामयः ।
प्रातर् मध्याह्न सायाह्ने सन्ध्या वन्दन कृत् प्रियः ॥ १३ ॥

प्रातर् ब्राह्मण हस्ताब्ज जलाञ्जलि सुखी सदा ।
तपनस् तापनो विश्वस् तीर्थोदय उदार धीः ॥ १४ ॥

भूरस ग्राहकश् चेति सूर्य नाम शतं परम् ॥ १५ ॥

## ॥ फल श्रुतिः ॥

साष्टकं कथितं तुभ्यं पाप रोग हरं परम् ॥ १६ ॥

सर्व ज्वर प्रशमनं सर्व व्याधि महौषदम् ।
पवित्रं पुण्यदं पुण्यं यः पठेत् सुसमाहितः ॥ १७ ॥

तस्य सर्वार्थ सिद्धिः स्याद् यद् यन् मनसि वर्त्तते ।
उत्पन्नेषु ह्यरिष्टेषु सङ्कल्प्येदं पठेत् शुभम् ॥ १८ ॥

तदा तस्या ऽ रिष्ट शान्तिर् भवत्येव न संशयः ।
रवि प्रिय दिने पुण्ये रविं संपूज्य यः पठेत् ॥ १९ ॥

स रवेर् मण्डलं भित्वा याति ब्रह्म ह्यनागतिम् ॥ २० ॥

---

**॥ इति बृहद् धर्म पुराणे एकादशो ऽ ध्याये श्रीसूर्य शत नाम स्तोत्रं सम्पूर्णम् ॥**